**अञ्जन** न० अज्यतेऽनेन अन्ज-करणे ल्युट्। कज्जले। "अपि खञ्जनमञ्जनमञ्जनाञ्चितमिति" नैष०। "मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्। पूर्ब्बाह्ण एव कुर्व्वीतेति" स्मृतिः। "विलोचनं दक्षिणमञ्जनेन संभाव्येति" रघुः। अञ्जनविशेषाश्च सुश्रुते दर्शिता यथा "चत्वार एते योगाः स्युरुभयोरञ्जने हिताः। कुब्जकाशोकशालाम्रप्रियङ्गुनलिनोत्पलैः॥ पुष्पैर्हरेणुकृष्णाह्वापथ्यामलकसंयुतैः। सर्पिर्मधुयुतैश्चूर्णै र्वेणुनाड्यामवस्थितैः॥ अञ्जयेद् द्वावपि भिषक् पित्तश्लेष्मविभावितौ। आम्रजम्बूद्भवं पुष्पं तद्रसेन हरेणुकाम्॥ पिष्ट्वा क्षौद्राज्यसंयुक्तां प्रयोज्यमथ वाञ्जनम्। नलिनोत्पलकिञ्जल्कगैरिकै र्गोशकृद्रसैः॥ गुडिकाञ्जनमेतद्वा दिनरात्र्यन्धयोर्हितम्। रसाञ्जनरसक्षौद्रतालीशस्वर्णगैरिकम्॥ गोशकृद्रससंयुक्तं पित्तोपहतदृष्टये। शीतं सौवीरकं वापि पिष्ट्वाथ रसभावितम्॥ कूर्म्मपित्तेन मतिमान् भावयेद्रौहितेन वा। चूर्णाञ्जनमिदं नित्यं प्रयोज्यं पित्तशान्तये॥ काश्मरीपुष्पमधुकदार्व्वीलोध्ररसाञ्जनैः। सक्षौद्रमञ्जनन्तद्वद्धितं नेत्रामये सदा॥ स्रोतोजं सैन्धवं कृष्णां रेणुकाञ्चापि पेषयेत्। अजमूत्रेण ता वर्त्त्यः क्षणदान्ध्याञ्जने हिताः॥ कालानुसारिवां कृष्णां नागरं मधुकं तथा। तालीशपत्रं क्षणदे गाङ्गेयञ्च शकृद्रसे॥ कृतास्ता वर्त्तयः पिष्ट्वा छायाशुष्काः सुखावहाः। मनःशिलाभयाव्योषबलाकालानुसारिवाः॥ सफेना वर्त्तयः पिष्टाश्छागक्षीरसमन्विताः। गोमूत्रपित्तमदिराशकृद्धात्रीरसे पचेत्॥ क्षुद्राञ्जनं रसे चान्यद्यकृतस्तैफलेऽपि वा। गोमूत्राज्याणवमलपिप्पलीक्षौद्रकट्फलम्॥ सैन्धवोपहितं युञ्ज्यान्निहितं वेणुगह्वरे। मेदोयकृद्धृतञ्छागं पिप्पल्यः सैन्धवं मधु॥ रसमामलकञ्चापि पक्कं सम्यङ्‌निधापयेत्। कोशे खदिरनिर्म्माणे तद्वत्क्षुद्राञ्जनं हितम्॥ हरेणुमगधाजास्थिमज्जैलायकृदन्वितम्। शकृद्रसेनाञ्जनं वा श्लेष्मप्रहतदृष्टये॥ विपाच्य गोधायकृदर्द्धपाटितं सुपूरितं मागधिकाभिरग्निना। निषेवितं तत्सकृदञ्जनेन निहन्ति नक्तान्ध्यमसंशयं खलु॥ तथा यकृच्छागभवं हुताशने विपाच्य सम्यङ्मगधासमन्वितम्। प्रयोजितं पूर्ब्बवदाश्वसंशयं जयेत् क्षपान्ध्यं सकृदञ्जनन्नृणाम्॥ प्लीहा यकृच्चाप्यपभक्षिते उभे प्रकल्प्य शूल्ये घृततैलसंयुतम्। ते सार्षपस्नेहसमायुतेऽञ्जनं नक्तान्ध्यमाश्वेव हतः प्रयोजिते। नदीजशिम्बीकटुकान्यथाञ्जनम्मनःशिला द्वे च निशे यकृद्रसे। स चन्दनेयं गुटिकाथ वाञ्जनं प्रशस्यते वै दिवसेष्वपश्यताम्" इति॥ सौवीरे, रसाञ्जने च। अञ्जनवर्णोऽस्त्यस्य। अर्श० अच्। ज्येष्ठदिग्गजे पु० उत्तरदिग्गजयोषिति केशरियोषिति वानर्याञ्च स्त्री०। "अञ्जनागर्भसम्भूतो वायुपुत्त्रो महाबल इति" तन्त्रम्। भावे ल्युट्। मिश्रीकरणे, लेपने व्यक्तिकरणे मालिन्ये च न० "निरञ्जनं दिव्यमुपैति साम्यमिति" निरवद्यं निरञ्जनमिति" च श्रुतिः। अञ्ज-णिच्-युच्। शक्यलक्ष्यार्थातिरिक्तार्थबोधके आलङ्कारिकोक्ते व्यञ्जनाख्ये शब्दशक्तिभेदे स्त्री० "अन्यार्थधीकृत् व्यापृतिरञ्जनेति" काव्यप्रकाशः। तत एव भावे ल्युट् तत्त्वार्थे न०।

**अञ्जनकेशी** स्त्री अञ्जनमिव केशो यस्याः ५त०। केशसंस्कारके हट्टविलासिनीनामके गन्धद्रव्ये। यत्संयोगात् केशस्यातीव कृष्णता स्यात्।

**अञ्जनशलाका** स्त्री अञ्जनसाधनं शलाका। अञ्जन दानार्थ शलाकायाम् "ज्ञानाञ्जनशलाकयेति" गुरुनतिः।

**अञ्जनागिरि** पु० अञ्जनवर्णो गिरिः किंशुका०दीर्घः। नीलपर्वते तद्विवरणं नीलगिरिशब्दे।

**अञ्जनाद्रि** पु० अञ्जनमिव कृष्णः अद्रिः। नीलपर्वते "अञ्जनाद्रिनिभां श्यामामिति" कालीध्यानम्।

**अञ्जनाधिका** स्त्री अञ्जनादधिका कृष्णत्वात् ५त०। (आजनाइ) इति ख्याते कीटभेदे।

**अञ्जनावती** स्त्री अञ्जनं विद्यतेऽस्याः अधिककृष्णवर्णत्वात् अञ्जन+मतुप् वत्वं दीर्घः। ईशानकोणस्य हस्तिन्याम्। कालाञ्जवृक्षे पु०।

**अञ्जनिका** स्त्री अञ्जनवर्णोऽस्त्यस्याः ठन् कापि पूर्ब्बाकारस्य इत्त्वम्। (आजनाइ) इति प्रसिद्धे अञ्जनाख्ये कीटभेदे। अञ्जना स्वार्थे कन्। प्रतीकदिग्गजस्त्रियाम्। पुरोहि०यक्। आञ्जनिक्यम् तद्भावे न०।

**अञ्जनी** स्त्री अज्यते चन्दनकुङ्कुमादिभिरसौ अन्ज-कर्म्मणि ल्युट् ङीप्। कुङ्कुमाद्यनुलिप्तायाम् स्त्रियाम्। करणे ल्युट्। कटुकावृक्षे, कालाञ्जनवृक्षे च। "अञ्जनीदारुकाष्ठमयस्तम्भः मैत्रावरुणः" इति याज्ञिकाः न्याय्यायां स्त्रियाञ्च।

**अञ्जलि** पु० अन्ज-अलि। संयुतकरपुटे, "श्रवणाञ्जलिपुटपेयमिति वेणी०। "न्यायप्रसूनाञ्जलिरिति" उदयनः कुडवपरिमाणे च अञ्जलिपरिमितद्रव्ये च "प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयमिति" वेणी०। [बालमूषिकायाम्।

**अञ्जलिका** स्त्री अञ्जलिरिव कायति प्रकाशते कै-क टाप्।